# संस्कृत-वार्ता:

**दिनाङ्क :-30.07.2024**
**प्रात: - 06:55**

**अथ वार्ता:**

**प्रधानमन्त्री**

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य नवदिल्ली-नगरे विकसितभारतम् प्रति यात्रा-केंद्रीयवित्तसंकल्पना' इति सम्मेलनस्य उद्धाटनसत्रम् सम्बोधयिष्यते। भारतीयोद्योगपरिसङ्घेन सि.आईआई. इत्यनेन. अस्य सम्मेलनस्य आयोजनं क्रियते तथाच अस्योद्देश्यम् विकासाय प्रशासनस्य व्यापकम् दृष्टिकोणम् अथ च एतस्मिन् प्रयासे उद्योगस्य भूमिकाया: रूपरेखाया: प्रस्तुतिकरणम् विद्यते। उद्योगजगत:, सर्वकारस्य, कूटनीतिकसमुदायस्य, चिन्तकानां च एकशताधिकाः प्रतिभागिनः व्यक्तिगतरूपेण सम्मेलने भागं ग्रहीष्यन्ति, सहैव देशविदेशेभ्य: च विभिन्नेभ्यः स्थलेभ्य: सि.आई.आई. इत्यनेन केन्द्रेण सह सम्पर्कं साधयिष्यन्ति।

**जयशंकर: - क्वाड**

विदेशमन्त्रिणा जयशंकरेण प्रोक्तं यत् समयोऽयं संघर्षपूर्णोऽस्ति, स्थिरतायां, सुरक्षायां, प्रगतौ सम्पन्नतायां वा भवतु अन्ताराष्ट्रियै: विश्वस्तमित्रै: सहयोगोऽपेक्षते; तदर्थं 'क्वाड्' इति अन्यतम: समकालीन: उदाहरणभूतोऽस्ति। श्रीजयशंकर: 'क्वाड्' इति समूहान्तर्गतानां विदेशमन्त्रिणां सम्मेलनानन्तरं वार्ताहरै: सह सम्भाषयन् टोक्यो-नगरे उक्तवान् यत एतत् सन्तोषप्रदम् अस्ति, यत् कियता गाम्भीर्येण, व्यवस्थितत्या च क्वाड् इत्यनेन विदेशनीतय: अन्तर्निहिता: सन्तीति। तेनोक्तम् यत् अद्यतनीयम् उपवेशनम् दिङ्निर्देशनदृष्ट्या महदुपकारकं वर्तते। श्रीजयशंकर: अवोचत् यत् विश्वसनीयाया: दूरसचार-प्रौद्योगिक्या: कार्याचरणम् अद्य अन्त: सागरीय सम्पर्कतन्त्रविस्तारश्च आपदुद्धाराय, जलवायुकार्येभ्य:, आधारभूतसंरचनाभ्य: क्षमताभिवर्धनपूर्वकं प्रशिक्षणाय, आतंकवादस्य प्रतिकाराय च सहायकभूतोऽस्ति। डॉ.सुब्रह्मण्यम् जयशंकर: टोक्यो-नगरे क्वाड् इत्यस्य विदेशमन्त्रिणां सम्मेलने स्वसमकक्षै: अमेरिका-ऑस्ट्रेलिया-जापानस्य च विदेशमन्त्रिभि: समम् आसीत्।

**राजनाथ- डीएसी**

रक्षाधिग्रहणपरिषदा डीएसी-इत्यनेन भारतीयतटरक्षकस्य क्षमतां संवर्धयितुं नवीनतमं-अत्याधुनिक-प्रणाल्या संयुतानां द्वाविंशतिः इन्टरसेप्टर-इति नौकानां क्रयणाय स्वीकृतिः प्रदत्ता । तेषां उपयोगः तटीयनिरिक्षणे अन्वेषणे उद्धारकार्यक्रमे च भविष्यति। एताः नौकाः प्रादेशिकजले त्वरितावरोधने, निम्नस्तरीयजलस्य संचालने च समर्थाः सन्ति। रक्षामन्त्रीराजनाथसिंहस्य अध्यक्षतायां रक्षाधिग्रहणपरिषदः सम्मेलनं ह्यः एव नवदिल्ल्यां सम्पन्नम्।

**विदेशमंत्रालयः लेबनान**

लेबनान स्थितेन भारतीय दूतावासेन ह्यः भारतीय नागरिकाणां कृते यात्रा परामर्शः प्रकाशितः। अवधेयं वर्तते यत् इज्रैलदेशेन लेबनानस्थितं हिजबुल्लाहदलं प्रत्यादेश: प्रदत्त:, येन संघर्ष: इतोपि संवर्धितुं शक्नोति।

**ऋतुविज्ञानविभागः**

भारतस्य ऋतुविज्ञानविभागेन आगामिषु पञ्चदिनेषु हिमाचलप्रदेशे, उत्तराखण्डे, पूर्वराजस्थाने च व्यापकरूपेण लघुतः मध्यमपर्यन्तं वर्षाणां पूर्वानुमानं कृतम् अस्ति। आगामिषु पञ्चदिवसेषु जम्मू-कश्मीर-लद्दाख, गिल्गित-बाल्तिस्तान-मुजफ्फरबाद, पञ्जाब, हरियाणा, चण्डीगढ, दिल्ली, उत्तरप्रदेश, पश्चिमराजस्थानेषु च विकीर्णवृष्टेः पूर्वानुमानं कृतमस्ति। ऋतुविज्ञानविभागेन इत्यपि उक्तं यत् अद्य पूर्वराजस्थानस्य उपरि अपि च बुधवासरे पश्चिमोत्तरप्रदेशस्य हिमाचलप्रदेशस्य उत्तराखण्डस्य च उपरि एकाधिकस्थानेषु अत्यन्त प्रचण्डवृष्टिः सम्भवति।

**।।इति वार्ता:।।**